# Shri Shukaproktam Vishnoh Viradrupavarnanam

# શ્રીશુકપ્રોક્તં વિષ્ણોઃ વિરાડ્રૂપવર્ણનમ્

## Document Information

Text title : Shri Shukaproktam Vishnoh Viradrupavarnanam

File name : shukaproktaMviShNoHvirADrUpavarNanam.itx

Category : vishhnu, vishnu, bhAgavatapurANa

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 2/1/24-37||

Latest update : September 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 6, 2025

*sanskritdocuments.org*

# શ્રીશુકપ્રોક્તં વિષ્ણોઃ વિરાડ્રૂપવર્ણનમ્

શ્રીશુક ઉવાચ ।
જિતાસનો જિતશ્વાસો જિતસઙ્ગો જિતેન્દ્રિયઃ ।
સ્થૂલે ભગવતો રૂપે મનઃ સન્ધારયેદ્ધિયા ॥ ૨૩॥

વિશેષસ્તસ્ય દેહોઽયં સ્થવિષ્ઠશ્ચ સ્થવીયસામ્ ।
યત્રેદં દૃશ્યતે વિશ્વં ભૂતં ભવ્યં ભવચ્ચ સત્ ॥ ૨૪॥

આણ્ડકોશે શરીરેઽસ્મિન્ સપ્તાવરણસંયુતે ।
વૈરાજઃ પુરુષો યોઽસૌ ભગવાન્ ધારણાશ્રયઃ ॥ ૨૫॥

પાતાલમેતસ્ય હિ પાદમૂલં
પઠન્તિ પાર્ષ્ણિપ્રપદે રસાતલમ્ ।
મહાતલં વિશ્વસૃજોઽથ ગુલ્ફૌ
તલાતલં વૈ પુરુષસ્ય જઙ્ઘે ॥ ૨૬॥

દ્વે જાનુની સુતલં વિશ્વમૂર્તે-
રૂરુદ્વયં વિતલં ચાતલં ચ ।
મહીતલં તજ્જઘનં મહીપતે
નભસ્તલં નાભિસરો ગૃણન્તિ ॥ ૨૭॥

ઉરઃસ્થલં જ્યોતિરનીકમસ્ય
ગ્રીવા મહર્વદનં વૈ જનોઽસ્ય ।
તપો રરાટીં વિદુરાદિપુંસઃ
સત્યં તુ શીર્ષાણિ સહસ્રશીર્ષ્ણઃ ॥ ૨૮॥

ઇન્દ્રાદયો બાહવ આહુરુસ્રાઃ
કર્ણૌ દિશઃ શ્રોત્રમમુષ્ય શબ્દઃ ।
નાસત્યદસ્રૌ પરમસ્ય નાસે
ઘ્રાણોઽસ્ય ગન્ધો મુખમગ્નિરિદ્ધઃ ॥ ૨૯॥

દ્યૌરક્ષિણી ચક્ષુરભૂત્પતઙ્ગઃ
પક્ષ્માણિ વિષ્ણોરહની ઉભે ચ ।
તદ્ભ્રૂવિજૃમ્ભઃ પરમેષ્ઠિધિષ્ણ્ય-
માપોઽસ્ય તાલૂ રસ એવ જિહ્વા ॥ ૩૦॥

છન્દાંસ્યનન્તસ્ય શિરો ગૃણન્તિ
દંષ્ટ્રા યમઃ સ્નેહકલા દ્વિજાનિ ।
હાસો જનોન્માદકરી ચ માયા
દુરન્તસર્ગો યદપાઙ્ગમોક્ષઃ ॥ ૩૧॥

વ્રીડોત્તરોષ્ઠોઽધર એવ લોભો
ધર્મઃ સ્તનોઽધર્મપથોઽસ્ય પૃષ્ઠમ્ ।
કસ્તસ્ય મેઢ્રં વૃષણૌ ચ મિત્રૌ
કુક્ષિઃ સમુદ્રા ગિરયોઽસ્થિસઙ્ઘાઃ ॥ ૩૨॥

નદ્યોઽસ્ય નાડ્યોઽથ તનૂરુહાણિ
મહીરુહા વિશ્વતનોર્નૃપેન્દ્ર ।
અનન્તવીર્યઃ શ્વસિતં માતરિશ્વા
ગતિર્વયઃ કર્મ ગુણપ્રવાહઃ ॥ ૩૩॥

ઈશસ્ય કેશાન્ વિદુરમ્બુવાહાન્
વાસસ્તુ સન્ધ્યાં કુરુવર્ય ભૂમ્નઃ ।
અવ્યક્તમાહુર્હૃદયં મનશ્ચ
સચન્દ્રમાઃ સર્વવિકારકોશઃ ॥ ૩૪॥

વિજ્ઞાનશક્તિં મહિમામનન્તિ
સર્વાત્મનોઽન્તઃકરણં ગિરિત્રમ્ ।
અશ્વાશ્વતર્યુષ્ટ્રગજા નખાનિ
સર્વે મૃગાઃ પશવઃ શ્રોણિદેશે ॥ ૩૫॥

વયાંસિ તદ્વ્યાકરણં વિચિત્રં
મનુર્મનીષા મનુજો નિવાસઃ ।
ગન્ધર્વવિદ્યાધરચારણાપ્સરઃ
સ્વરસ્મૃતીરસુરાનીકવીર્યઃ ॥ ૩૬॥

બ્રહ્માઽઽનનં ક્ષત્રભુજો મહાત્મા
વિડૂરુરઙ્ઘ્રિશ્રિતકૃષ્ણવર્ણઃ ।

નાનાભિધાભીજ્યગણોપપન્નો
દ્રવ્યાત્મકઃ કર્મ વિતાનયોગઃ ॥ ૩૭॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે દ્વિતીયસ્કન્ધે પ્રથમાધ્યાયાન્તર્ગતં
શ્રીશુકપ્રોક્તં વિષ્ણોઃ વિરાડ્રૂપવર્ણનં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૨/૧/૨૪-૩૭॥

bhAgavatapurANa . adhyAya 2/1/24-37..

Proofread by PSA Easwaran

---

*Shri Shukaproktam Vishnoh Viradrupavarnanam*
pdf was typeset on September 6, 2025

Please send corrections to *sanskrit@cheerful.com*